दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-177 | 1 | अप्रैल 26, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८२,
कलियुगाब्दः ५१२६ वसन्त-ऋतुः
सूर्यः उत्तरायणः वैशाखकृष्णत्रयोदशी
वैशाख 13 प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशराजभवनात् अपसारितः शिमलासहमतिः ऐतिहासिकोत्पीठिकायाः उपरि स्थापितः पाकिस्तानस्य स्मारकध्वजः

3 अनेकेषु राज्येषु तापमानं त्रीणि-तः पञ्च डिग्रीपर्यन्तं वर्धितुं शक्नोति- ऋतुविज्ञानविभागः

4 प्रत्येकपञ्चायते कृषियन्त्रभाडाकरकेन्द्राणि संस्थाप्यन्ते - विजयकुमारसिन्हाः


## जम्मू-कश्मीरे पहलगाम-आतङ्की-आक्रमणस्य पश्चात् उपराज्यपालः मनोजसिन्हा सेनाप्रमुखः उपेन्द्र द्विवेदी च समग्रसुरक्षास्थितेः विषये चर्चां कृतवन्तौ

हिमसंस्कृतवार्ताः - पहलगाम-आतङ्की-आक्रमणस्य पश्चात् सुरक्षा-स्थितेः समीक्षां कर्तुं सेनाप्रमुखः जनरल् उपेन्द्र-द्विवेदी श्रीनगरम् प्राप्तः। श्रीनगरे स्थितस्य चिनारकोर-इत्यस्य जनरल-आफिसर-कमाण्डिङ्ग्-इति सैन्याधिकारिणा, आतङ्कवादिनः विरुद्धं क्रियमाणानां समग्र-सुरक्षा-स्थितेः, अभियानानां च विषये, पाकिस्तान-सेनायाः नियन्त्रणरेखायाः सीमायां युद्धविरामस्य उल्लङ्घनस्य प्रयासस्य च विषये सेनाप्रमुखम् अवगमनं कारितम्। जनरल् द्विवेदी उपराज्यपालेन मनोजसिन्हा इत्यनेन सह मिलित्वा, आक्रमणानन्तरं समग्रसुरक्षास्थितेः विषये चर्चां कृतवान्।



सेनाप्रमुखः दक्षिणकश्मीरस्य अनन्तनागमण्डलस्य बैसरनवनग्रामे पहलगाम-आक्रमणस्थलस्य भ्रमणस्य सम्भावना अस्ति। प्राप्तावार्तानुसारेण उत्तरकश्मीरस्य कुपवाड़ामण्डले नियन्त्रणरेखायाः अनेकस्थानेभ्यः पाकिस्तानसेनायाः युद्धविरामस्य उल्लङ्घनस्य सूचनाः सन्ति।

## डॉ. के. कस्तूरीरंगनस्य निधनम्



**हिमसंस्कृतवार्ताः।** डॉ. के. कस्तूरीरंगनस्य निधनम् जातम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना श्रद्धांजलिं प्रकटयन् उक्तं यत् डॉ कस्तूरीरङ्गनः भारतस्य अन्तरिक्षकार्यक्रमं नूतनोन्नतस्थानं प्रेषयन्, अतीव परिश्रमेण इसरो इत्यस्य सेवां कृतवान्। प्रधानमन्त्री नरेन्द्रमोदी भारतस्य वैज्ञानिकशैक्षिकयात्रायाः परमपुरुषस्य डॉ. के. कस्तूरीरंगनवर्यस्य निधनविषये श्रद्धांजलिं प्रकटितवान् । सामाजिक-संजालीय-माध्यमेन नरेन्द्रमोदी अवदत् यत् तस्य दूरदर्शी-नेतृत्वं, राष्ट्राय निःस्वार्थयोगदानं च सर्वदा स्मर्यते। प्रधानमन्त्रिणा प्रकाशितं यत् डॉ कस्तूरीरङ्गनः भारतस्य अन्तरिक्षकार्यक्रमं नूतनोन्नतस्थानं प्रेषयन्, अतीव परिश्रमेण इसरो इत्यस्य सेवां कृतवान्। श्रीमोदी अवदत् यत् तस्य नेतृत्वं महत्त्वाकांक्षायुतानाम्, उपग्रह-प्रक्षेपणानां साक्षी अपि अभवत्। प्रधानमन्त्रिणा मोदिना उक्तं यत्, राष्ट्रिय शिक्षानीतेः प्रारूपणकाले, भारते, शिक्षणं अधिकं समग्र, अग्रे-दृष्टिशीलं च भवतु इति सुनिश्चित्य, डॉ. कस्तूरीरङ्गनेन कृत-प्रयत्नस्य कृते भारतं सदैव कृतज्ञः भविष्यति। मोदी अवदत् यत्, सः अनेकेषां युवानां वैज्ञानिकानां शोधकर्तृणां च उत्कृष्टः मार्गदर्शकः अपि आसीत्।

## केन्द्रसर्वकारेण सर्वोच्च-न्यायालये वक्फ अधिनियमसंशोधनं रक्षायता उक्तं यत् नूतना विधिः सम्पत्ति-प्रबंधनं आधुनिकी करोति

हिमसंस्कृतवार्ताः - केन्द्रेण सर्वोच्चन्यायालये उक्तं यत् सर्वकारीय-निज-भूमिषु अतिक्रमणं कृत्वा दुरुपयोगं निवारयितुं वक्फ-मण्डलस्य परिचालनेषु पारदर्शितां सुनिश्चेतुं च पञ्चनवत्यधिक-ऊनविंशति-तमे वर्षे वक्फ-अधिनियमे संशोधनं अभवत्। अल्पसंख्यककार्याणां मन्त्रालयेन एकस्मिन् प्रतिवेदने त्रयोदशोत्तर-द्विसहस्रतमे वर्षे संशोधनात् परं वक्फक्षेत्रे षोडशोत्तरैकशत-प्रतिशतं वृद्धिः अभवत् इति उद्धृत्य उक्तं यत् अनेकानि वक्फमण्डलानि गुप्तरूपेण कार्यं कुर्वन्ति, येन ते समग्रसम्पत्त्याः अभिलेखानाम् उपरोपणे असफलाः भवन्ति।



केन्द्रेण उक्तं यत् पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षस्य वक्फ (संशोधन) अधिनियमस्य उद्देश्यं धार्मिकप्रथाः प्रभाविकरणं विना सम्पत्तिप्रबन्धनस्य आधुनिकीकरणम् अस्ति।

## विश्वनेतारः प्रधानमन्त्रिणं नरेन्द्रमोदिनं सम्पर्कं कृत्वा पहलगाम-आतङ्कवाद्याक्रमणस्य निन्दां कृतवन्तः

हिमसंस्कृतवार्ताः - ब्रिटिश-प्रधानमन्त्री कीर-स्टार्मरः अथ डच-प्रधानमन्त्री डिक-शूफः पहलगाम-आतङ्क्याक्रमणस्य निन्दां कृतवन्तौ । श्रीस्टार्मरः दूरभाषामाध्यमेन प्रधानमन्त्रिणं श्रीमोदिनं सम्पर्कं कृत्वा निर्दोष-नागरिकाणां हत्यायां दुःखसंवेदनां प्रकटयत्। अन्यत्र श्रीशूफ इत्यनेनापि उपर्युक्त-विषयं प्रति संवेदनाः प्रकटिताः। प्रधानमन्त्री श्रीमोदी द्वाभ्यामपि आभारं प्रकटयन् उक्तवान् यत् अग्रेऽपि आतङ्कवादस्य विरुद्धं कार्याचरणे तयोः समर्थनम् अपेक्षते।

## पहलगामे आतङ्कवादी आक्रमणं विरुद्ध्य राष्ट्रिय-राजधानी-देहल्यां विपण्यः पिहिताः

हिमसंस्कृतवार्ताः - पहलगामे आतङ्कवादी आक्रमणं विरुद्ध्य राष्ट्रिय-राजधानी-देहल्याः अनेकाः विपण्यः पिहिताः आसन् । जनाः आतङ्क्याक्रमणे मृतेभ्यः श्रद्धांजलिं प्रदातुं चान्दनी-चौकतः रेड्-फोर्ट् इति रक्तदुर्गपर्यन्तं पथप्रदर्शनं कुर्वन्तः दृष्टाः । अखिल-भारतीय-व्यापारी-परिसङ्घस्य महासचिवः अथ दिल्ली-भाजपा-संसदः प्रवीण-खण्डेलवालः उक्तवान् यत् देहल्यां नवशताधिकानि आपणानि सम्पूर्णरूपेण पिहितानि वर्तन्ते ।



## सुभाषितम्

**अनाहूतः प्रविशति,
अपृष्टो बहु भाषते।
अविश्वस्ते विश्वसिति,
मूढचेता नराधमः॥**

भावार्थः- किसी के बिना बुलाए पहुंच जाना, बिना पूछे बहुत बोलना, जो विश्वास के योग्य न हो उस पर विश्वास करना ये सभी मूर्खों के लक्षण हैं। ऐसे मनुष्य अधम मनुष्यों की पंक्ति में आते हैं।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## अमानवीयतत्त्वैः देशस्य आत्मनि प्रहारं कर्तुं प्रयत्नः कृतः - केन्द्रीयमन्त्री ज्योतिरादित्य-सिन्धिया



हिमसंस्कृतवार्ताः - केन्द्रीयमन्त्रिणा ज्योतिरादित्य-सिन्धिया इत्यनेन पहलगामे आतङ्क्याक्रमणस्य निन्दां कुर्वता उक्तं यत् अमानवीयतत्त्वैः देशस्य आत्मनि प्रहारं कर्तुं प्रयत्नः कृतः परञ्च भारतम् इतोपि द्रुततरं उच्चतरं च उत्तिष्ठति। नवदेहल्याम् एकस्मिन् कार्यक्रमे प्रवदन् मन्त्री उक्तवान् यत् भारतस्य जनाः, प्रत्येकस्मिन् राज्ये, प्रत्येकस्याम् आस्थायां, एकस्वरेण च एकत्रिताः सन्ति।

## उत्तरकश्मीरस्य बंदीपोरामण्डले एकः आतङ्कवादी सहचरः मारितः



हिमसंस्कृतवार्ताः जम्मू-कश्मीरे उत्तरकश्मीरस्य बंदीपोरामण्डलस्य बाजिपोराकुलनारक्षेत्रे आतङ्कवादविरोधी अभियाने एकः आतङ्कवादी सहचरः मारितः। हतः आतङ्कवादीसहचरः लश्कर-ए-तैबा- इत्यातङ्कवादीसङ्गटनस्य सदस्यः अल्ताफ लल्ली इति परिचितः। उत्तरकश्मीरस्य बन्दीपोरामण्डले गोलीकाप्रहारस्य भयंकर-आदानप्रदानस्य अनन्तरं वनक्षेत्रे भारतीय-सैन्य-जम्मू-कश्मीर-आरक्षक- संयुक्तबलयोः आतङ्कवादी-अन्वेषण-अभियानं निरन्तरं प्रचलति।

## राष्ट्रिय-मानवाधिकार-आयोगेन जम्मूकश्मीरस्य पहलगामे आतङ्कवादिभिः निर्दोष-नागरिकाणां हत्यायाः कठोरनिन्दा कृता




हिमसंस्कृतवार्ताः - राष्ट्रिय-मानवाधिकार-आयोगेन जम्मूकश्मीरस्य पहलगामे आतङ्कवादिभिः निर्दोष-नागरिकाणां हत्यायाः कठोरनिन्दा कृता । एकस्मिन् वक्तव्ये आयोगेन उक्तं यत् आतंकवादे प्रत्यक्षेण परोक्षेण वा संलिप्तानाम् आततायिनां विरुद्धं कठोरदण्डदानस्य समयः अधुना आगतोऽस्ति अथ च ते आततायिनः एव अस्य मानवतायाः विरुद्धं कृतापराधस्य उत्तरदायिनः सन्ति ।

## फ्रान्सदेशः भारतेन अथ भारतीयैः सह दृढतया स्थितः वर्तते- फ्रान्सदेशस्य राष्ट्रपतिः इमैनुएल मैक्रों



हिमसंस्कृतवार्ताः - फ्रान्सदेशस्य राष्ट्रपतिः इमैनुएल मैक्रों जम्मूकश्मीरस्य पहलगामे संजातस्य आतंकी-आक्रमणस्य विषयं ज्ञात्वा उक्तवान् यत् फ्रान्सदेशः भारतेन अथ भारतीयैः सह दृढतया स्थितः वर्तते । प्रधानमन्त्रिणा नरेन्द्रमोदिना सह दूरभाषमाध्यमेन सम्भाषयन् राष्ट्रपतिः मैक्रों आतङ्की-आक्रमणस्य कठोरनिन्दां कृतवान् अथ गहन-संवेदनामपि प्रकटयत्। अग्रेऽपि सः इदमुक्तवान् यत् फ्रान्सदेशः तस्य सहवर्तिभिः सह यत्र क्वापि अपेक्षा वर्तते तत्र आतंकवादस्य विरुद्धं युद्धाय सन्नद्धो वर्तते । अवधेयमस्ति यत् सम्पूर्ण विश्वं पहलगामे आतङ्की-आक्रमणस्य निन्दाम् अकरोत् ।

# हिमाचलप्रदेशराजभवनात् अपसारितः शिमलासहमतिः

## ऐतिहासिकोत्पीठिकायाः उपरि स्थापितः पाकिस्तानस्य स्मारकध्वजः

**हिमसंस्कृतवार्ताः - शिमला।**

१९७२ तमे वर्षे जुलाईमासस्य २ दिनाङ्के भारत-पाकिस्तानयोः मध्ये उत्तमसम्बन्धं स्थापयितुं शिमला-सहमतिः हस्ताक्षरं जातम्। तस्यां सहमत्यां तत्कालीनप्रधानमन्त्री इन्दिरागान्धी राष्ट्रपतिः जुल्फिकर अली भुट्टो च बार्न्स कोर्ट (अधुना राजभवन) इत्यत्र हस्ताक्षरं कृतवन्तौ। यत्र शिमलासहमतिः अभवत् तस्याम् उत्पीठिकायां भारतस्य पाकिस्तानस्य च ध्वजैः सह पुरातनानि छायाचित्राणि स्थापयित्वा स्मृतयः रक्षिताः आसन्। पाकिस्तानदेशात् सहमतिः निरस्तीकरणस्य विषये वक्तव्यस्य अनन्तरं राजभवनेन पाकिस्तानस्य ध्वजः अपसारितः यः उपहासपूर्वकं उत्पीठिकायाः उपरि लम्बमानः आसीत्। पहलगाम- आतङ्क- आक्रमणानन्तरम् अधुना शिमला-सहमति स्मृतौ केवलं त्रिवर्णीयः ध्वजः एव उत्पीठिकायाः उपरि स्थापितः अस्ति।




### १९७२ तमे वर्षे जुलाईमासस्य २ दिनाङ्के शिमलासहमतिः जाता।

भारत-पाकिस्तानयोः मध्ये १९७२ तमे वर्षे जुलै-मासस्य २ दिनाङ्के शिमला-सहमतौ हस्ताक्षरं कृतम्। अस्यां सहमतौ हस्ताक्षरार्थं प्रयुक्ता सारणी राजभवने धरोहररूपेण स्थापिता अस्ति। राजभवनं आगच्छन्तः प्रत्येकस्य व्यक्तेः नेत्राणि स्वयमेव उत्पीठिकासमीपं गच्छन्ति। अत्र आगच्छन्तः सर्वे अपि उत्पीठिकया सह छायाचित्रं गृह्णन्ति। भारतस्य पाकिस्तानस्य च ध्वजाः स्मारिकारूपेण उत्पीठिकायाः उपरि स्थापिताः आसन्। यस्मिन् पार्श्वे तत्कालीनप्रधानमन्त्री इन्दिरा गान्धी उपविष्टा आसीत्, तस्मिन् पार्श्वे भारतीयत्रिवर्णः स्थापितः, यस्मिन् पार्श्वे पाकिस्तानस्य तत्कालीनः राष्ट्रपतिः जुल्फिकर अली भुट्टो उपविष्टः आसीत्, तस्मिन् पार्श्वे पाकिस्तानस्य ध्वजः परचम- ए-सितारा स्थापितः आसीत्। अधुना केवलं त्रिवर्णः एव अस्य उत्पीठिकायाः वैभवं वर्धयति। राजभवनसचिवालयेन पाकिस्तानस्य ध्वजः अपसारितः अस्ति।

### का अस्ति शिमला सहमतिः?

१९७१ तमे वर्षे भारत-पाक-युद्धस्य अनन्तरं ९० सहस्राधिकाः पाकिस्तानीसैनिकाः युद्धबन्दीरूपेण गृहीताः। तदनन्तरं भारत- पाकिस्तानयोः सम्बन्धपरिष्काराय, पाकिस्तानी- युद्धबन्दीनां मुक्तिं कर्तुं प्रयत्नाः आरब्धाः। ततः १९७२ तमे वर्षे जुलाईमासस्य २ दिनाङ्के शिमलानगरे द्वयोः देशयोः उत्तमसम्बन्धाय सहमतिः कृता। उभौ देशौ १९७१ तमे वर्षे सितंबर-मासस्य १७ दिनाङ्कं युद्धविरामरूपेण स्वीकृतवन्तौ। अस्याः सहमत्या २० दिवसाभ्यन्तरे उभयोः देशयोः सेनाः स्वस्वसीमां गमिष्यन्ति इति निर्णयः अभवत्। भविष्ये द्वयोः देशयोः/ सर्वकारयोः प्रमुखाः मिलित्वा भविष्यन्ति। उभयोः देशयोः अधिकारिणः सामान्यसम्बन्धं स्थापयितुं निरन्तरं वार्तालापं करिष्यन्ति। सर्वेषां विवादानाम् समस्यानां च शान्तिपूर्ण- निराकरणाय उभयदेशयोः प्रत्यक्षवार्ता भविष्यति। तृतीयपक्षेण मध्यस्थता न भविष्यति। परिवहनसुविधाः स्थापिताः भविष्यन्ति। यथा उभयदेशानां जनाः सहजतया आगत्य गन्तुं शक्नुवन्ति। यथासम्भवं व्यापारः आर्थिकसहकार्यं च पुनः स्थापितं भविष्यति।

# देवभूमि क्षत्रिय सङ्गटनस्य एवं स्वर्णमोर्चा इत्यस्य कार्यकर्तृभिः विरुद्धं प्राथमिकी



हिमसंस्कृतवार्ताः - शिमला। स्वर्णायोगस्य निर्माणस्य, अन्तर्जातीयविवाहप्रोत्साहनराशिवृद्धेः च विरोधे सचिवालयस्य बहिः होराभिः यावत् मार्गं अवरुद्ध्य देवभूमिक्षत्रियसङ्गटनस्य स्वर्णमोर्चायाः च कार्यकर्तॄणां विरुद्धं अधुना पुलिसेन कठोरकार्याणि कृतानि सन्ति। गुरुवासरे एतत् प्रदर्शनं सम्पन्नम्, यस्मिन् देवभूमिक्षत्रियसङ्गठनस्य बहवः सदस्याः भागं गृहीतवन्तः। टोलेण्डतः सचिवालयं प्रति विरोधसभां कृत्वा आन्दोलनकारिणः छोटाशिमलानगरस्य मुख्यमार्गे उपविश्य होलाभिः यावत् अवरुद्धवन्तः। अस्य कारणात् पुरातनबसस्थानकात् संजौलीमार्गपर्यन्तं यातायातस्य मार्गः सर्वथा बाधितः अभवत्, येन सामान्यजनाः विशेषतः विद्यालयस्य बालकाः बहु समस्यानां सम्मुखीकरणं कर्तुं प्रवृत्ताः आसन् सायंपर्यन्तं मार्गे एव स्थितानां आन्दोलनकारिणां कारणात् वाहनानां दीर्घपङ्क्तयः निर्मिताः । पुरातनबसस्थानकात् संजौलीपर्यन्तं मुख्यमार्गः पूर्णतया निरुद्धः आसीत्, संजौलीनगरं प्रति गच्छतां बसयानानां कृते लक्कडबाजारमार्गेण वैकल्पिकमार्गेण प्रेषितव्यम् आसीत् छोटाशिमला-नगरं प्रति गच्छद्भिः यात्रिभिः पदातिभिः गन्तव्यस्थानं प्राप्तव्यम् आसीत् ।

देवभूमिक्षत्रियसभा कथयति यत् स्वर्णायोगस्य निर्माणस्य याचना विगतवर्षद्वयेभ्यः लम्बिता अस्ति। संस्थायाः प्रदेशाध्यक्षः रूमितठाकुरः उक्तवान् आसीत् यत् मुख्यमन्त्री षड्मासाभ्यन्तरे आयोगस्य निर्माणं करिष्यामि इति प्रतिज्ञां कृतवान् परन्तु अधुना वर्षद्वयं व्यतीतवान् अपि अस्मिन् दिशि ठोसपदं न गृहीतम्। सः कथयति यत् यदा अन्यवर्गाणां कृते आयोगाः निर्मातुं शक्यन्ते तदा उच्चजातीयसमाजः किमर्थं उपेक्षितः भवति। उल्लेखनीयं यत् अस्मिन् प्रदर्शने न केवलं यातायातं स्थगितम् अभवत् अपितु सामान्यजीवनमपि प्रभावितम् अभवत् । कार्यालयं गन्तुं अन्येषां महत्त्वपूर्णकार्यस्य च कृते जनाः बहु कष्टान् अनुभवन्ति स्म । अधुना पुलिसप्रशासनम् अस्मिन् विषये कठोरं स्थापनं कृत्वा वैधानिकं कार्यं कुर्वन् अस्ति। बीएनएस-अधिनियमस्य धारा १८९(२), १२६(२), २२३ च अन्तर्गतं सभायाः प्रदेशाध्यक्षस्य रुमितठाकुरस्य अन्येषां च आन्दोलनकारिणां विरुद्धं पुलिसस्थानके छोटाशिमलायां प्रकरणं पंजीकृतम्।

# Pahalgam Terror Attack : काङ्ग्रेसः शिमलानगरे सिक्थवर्तिकायात्राम् अकरोत्, पहलगामे मृतानां कृते श्रद्धांजलिम्



**हिमसंस्कृतवार्ताः - शिमला।** जम्मू-कश्मीरस्य पहलगामे आतङ्कवादी-आक्रमणस्य विरोधे शुक्रवासरे राज्यकाङ्ग्रेस-अध्यक्षायाः प्रतिभासिंहायाः नेतृत्वे शिमलानगरे दलनेतृभिः कार्यकर्तृभिः च सिक्थवर्तिकायात्रा कृता। आतङ्कवादीनाम् आक्रमणे मृतानां कृते श्रद्धांजलिम् अर्पयन् तेषां प्राणानां शान्तिं प्रार्थयन् शोकग्रस्तपरिवारेभ्यः शोकसंवेदनाः च प्रकटिताः। शेर-ए-पञ्जाबतः मॉलरोड् मार्गेण सिक्थवर्तिकायात्रा रिड्जप्राङ्गणे श स्थितस्य राष्ट्रपिता महात्मा गान्धी इत्यस्य प्रतिमायाः सम्मुखं समाप्ता।

प्रदेशकाँग्रेसस्य प्रभारी सांसद रजनी पाटिल, मुख्यमंत्री सुखविंदरसिंहसुक्खुः, उपमुख्यमंत्री मुकेश अग्निहोत्री, मंत्री कर्नल धनीरामशांडिलः, हर्षवर्धनचौहानः, रोहितठाकुरः, अनिरुद्धसिंहः, सहप्रभारी चेतनःचौहानः विधायकेषु संजयरत्नः, संजयः अवस्थी, आशीषः बुटेलः, कुलदीपसिंहराठौरः, अनुराधा राणा, पूर्वमन्त्री रामलालठाकुरः तथा च अनेके वरिष्ठनेतारः प्रमुखसङ्घटनानां पदाधिकारिणः च सिक्थवर्तिकायात्रायां श्रद्धांजलीः अर्पितवन्तः । राज्यकार्याणां प्रभारी सांसद रजनी पाटिल अस्याः घटनायाः विषये गहनं दुःखं प्रकटयन्ती अवदत् यत् आतङ्कवादस्य विरुद्धं समग्रः देशः एकीकृतः अस्ति तथा च पहलगामे आतङ्कवादीनां आक्रमणस्य विरुद्धं केन्द्रसर्वकारस्य यत्किमपि निर्णयं भवति तेन सह काङ्ग्रेसः तिष्ठति। सा अवदत् यत् एतया घटनया समग्रः देशः आहतः अस्ति, अस्मिन् शोककाले काङ्ग्रेसः देशेन सह तिष्ठति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः आक्रमणे मृतानां कृते श्रद्धांजलिम् अर्पयन् उक्तवान् यत् अस्याः दुःखदघटनायाः कारणेन सम्पूर्णे देशे क्रोधः वर्तते। सः अवदत् यत् अस्मिन् आक्रमणे स्वपरिवारेण सह काश्मीरं गताः निर्दोषाः जनाः मारिताः, यत् अतीव दुःखदम् अस्ति। मुख्यमन्त्री उक्तवान् यत् सावधानतारूपेण राज्यसर्वकारेण अपि स्वस्य सर्वासु सीमासु सतर्कता वर्धिता। उपमुख्यमन्त्री मुकेश अग्निहोत्री अस्मिन् आक्रमणे अतीव दुःखं प्रकटयन् उक्तवान् यत् अद्य सम्पूर्णः देशः अस्मिन् आक्रमणे मृतानां जनानां प्रति शोकं प्रकटयति, तेषां परिवारैः सह तिष्ठति च। अस्य भीरुतायाः कृते आतङ्कवादिनः कृते भृशं दण्डं दातव्यम्। राज्यकाङ्ग्रेसस्य अध्यक्षा प्रतिभासिंह अवदत् यत् आतङ्कवादिनः न केवलं निर्दोषजनानाम् वधं कृतवन्तः अपितु देशस्य मानवतायाः च उपरि आक्रमणं कृतवन्तः, यत् कदापि सोढुं न शक्यते। सा अवदत् यत् इदानीं आतङ्कवादस्य पूर्णतया उन्मूलनस्य समयः आगतः, अस्य आक्रमणस्य उत्तरदायी जनाः कठोरतमं दण्डं प्राप्नुयुः इति। येन भविष्ये एतादृशी घटना न भवेत्। अस्मिन् काले सर्वे राष्ट्रपितुः महात्मागान्धिनः प्रतिमायाः सम्मुखे सिक्थवर्तिकाप्रकाशेन द्विनिमेषं मौनं कृत्वा दिवंगतात्मनां कृते श्रद्धांजलिम् अर्पितवन्तः।

# अनेकेषु राज्येषु तापमानं त्रीणि-तः पञ्च डिग्रीपर्यन्तं

## वर्धितुं शक्नोति- ऋतुविज्ञानविभागः




हिमसंस्कृतवार्ताः - ऋतुविज्ञानविभागेन पञ्जाब, हरियाणा, दिल्ली, उत्तरप्रदेश, राजस्थान, मध्यप्रदेशेषु च आगामिषु चतुर्दिनेषु उष्णताप-तरङ्गस्य स्थितेः पूर्वानुमानं कृतम् अस्ति। अरुणाचलप्रदेश, असम, मेघालय, नागालैण्ड्, मिजोरम, त्रिपुराराज्येषु प्रचण्डवृष्टेः सम्भावना वर्तते। ऋतुविभागेन उक्तं यत् अनेकेषु राज्येषु तापमानं त्रीणि-तः पञ्च डिग्रीपर्यन्तं वर्धितुं शक्नोति। आगामिषु षड् दिवसेषु पञ्जाब-हरियाणा-दिल्ली-प्रदेशेषु अधिकतमं तापमानं द्वाभ्यां त्रीणि डिग्री सेल्सियसपर्यन्तं वर्धितुं शक्नोति, उत्तरप्रदेशे च सप्तचत्वारिंशत् डिग्रीपर्यन्तं तापमानं भवितुं शक्यते । विभागेन झारखण्डे, तमिलनाडुराज्ये, पुड्डुचेर्याम्, कराईकले, केरलराज्ये, माहे, तटीयान्ध्रप्रदेशे, यनम-रायलसीमायां च इत्येतेषु स्थानेषु उष्णार्द्र-ऋतोः पूर्वानुमानं कृतम् अस्ति। अरुणाचलप्रदेश-असम-मेघालय-नागालैण्ड-मणिपुर-मिजोरम-त्रिपुराराज्येषु च प्रचण्ड-वृष्ट्याः सम्भावना वर्तते

# विश्व इम्युनाइजेशन सप्ताहस्य अन्तर्गतं पोषणविषयकं जागरूकताप्रदर्शनं सम्पन्नम्



**हिमसंस्कृतवार्ताः- दरभंगा।** कामेश्वरसिंह दरभंगा संस्कृतविश्वविद्यालये पोषणपखवाड़ा इत्यस्य अन्तर्गतं विश्व टीकाकरणसप्ताहे "गर्भवत्याः पोषणं कुपोषणं च" विषयकं चित्रात्मकं जागरूकताप्रदर्शनं आयोज्यम्। एषु कार्यक्रमे छात्रा काजल शर्मा चित्रेण संदेशं प्रदत्तवती कि "यदि माता पौष्टिकाहारं ग्रहीष्यति तर्हि माता-शिशू च स्वस्थे भविष्यतः। स्वस्थः बालकः पठितं लिखितं च जीवनं समृद्धिम् अर्हति, यथा कुपोषिता माता बालकम् अस्वस्थं दुर्बलञ्च भविष्यति।"

कार्यक्रमे व्याकरणविभागाध्यक्षः प्रो. दयानाथ झा, ज्योतिषविभागाध्यक्षः डॉ. कुणाल झा, दर्शनविभागाध्यक्षः डॉ. धीरज कुमार पांडेय, डॉ. शम्भू शरण तिवारी, डॉ. एल सविता आर्या, डॉ. अवधेश कुमार श्रोत्रिय, डॉ. वरुण कुमार झा, डॉ. माया कुमारी, डॉ. आलोक कुमार इति प्रमुखाः उपस्थिताः आसन्। सर्वे कार्यक्रमे सामाजिकमहत्त्वे प्रकाशम् अर्पितवन्तः।

प्रो. दयानाथ झा कार्यक्रमे अध्यक्षत्वं कृत्वा पोषणस्य संस्कारैः सह गहनं सम्बन्धं निरूपितवान्। डॉ. साधना शर्मा संयोजनेन च डॉ. सुधीर कुमार झा निर्देशनं कृत्वा कार्यक्रमे छात्र-छात्राणां मध्ये जागरूकतां उत्पन्नं कृतम्।

कार्यक्रमे विश्वमोहनः, राजेशः, गोविन्द झा च स्वयंसंवेदनायाः भागं प्रकटितवन्तः, स्वास्थ्यं च पोषणं सम्बद्धे प्रश्नानां च चर्चा कृता। समापनकाले पोषणस्य च टीकाकरणस्य महत्त्वे सर्वे सहमतिम् अभिव्यक्तवन्तः।

# Manrega Fund - पूर्वं धनं न आगतं, भविष्याय कैपिंग- कृतम्

**हिमसंस्कृतवार्ताः - शिमला।** मनरेगा-अन्तर्गतं उत्तमं प्रदर्शनं कृत्वा अपि एषा योजना हिमाचले विपर्यय इव दृश्यते। एकतः पुरातनदेयतानां लम्बनं भारं भवति अपरतः केन्द्रसर्वकारेण नूतनवर्षस्य कार्यदिनेषु कैपिंग-स्थापितम्। पंचायतीराजस्य तथा ग्रामीणविकासविभागस्य विवरणानुसारं विगतवित्तीये हिमाचले मनरेगायाः अंतर्गतं 1534 कोटि रुप्यकाणां कार्यं कृतम्। गतवर्षस्य लक्ष्यं ३०० लक्षं मनुष्यदिनम् आसीत्, यदा तु ३९५ लक्षं मनुष्यदिनानि प्राप्तानि सन्ति । अर्थात् प्रदर्शनं १३६ प्रतिशतं जातम्, परन्तु २०२५ तमस्य वर्षस्य मार्चमासस्य ३१ दिनाङ्कपर्यन्तं वेतनं अद्यापि न दत्तम्। अद्यापि भारतसर्वकारात् २४८ कोटिरूप्यकाणां अवशिष्टराशिः लम्बिता अस्ति । अस्मिन् सप्ताहे एतत् धनं आगमिष्यति इति अपेक्षा अस्ति। अस्य कारणात् २०२४ तमस्य वर्षस्य डिसेम्बर्-मासस्य २७ दिनाङ्कात् मनरेगा-कर्मचारिणः वेतनं प्राप्तुं न शक्तवन्तः ।हिमाचले मनरेगा-अन्तर्गतं ७.१६ लक्षं गृहाणि १०.२६ लक्षं जनाः च पञ्जीकृताः सन्ति, येषां प्रतिवर्षं जीविकायाः आवश्यकता वर्तते। अपरपक्षे यदि राज्यसर्वकारघटकस्य विषये वदामः तर्हि २०२५ तमस्य वर्षस्य मार्चमासस्य ३१ दिनाङ्कपर्यन्तं राज्यकोषात् ११४ कोटिरूप्यकाणां भुक्तिः अद्यापि न कृता अस्ति।राज्यसर्वकारेण मनरेगायां वर्धितं दैनिकवेतनं दातुं घोषितं, तस्य भुक्तिः कोषात् धनं प्राप्य एव भविष्यति। ततोऽपि बृहत्तरः समस्या अस्ति यत् २०२५-२६ वित्तवर्षस्य कृते भारतसर्वकारेण मनरेगा-अन्तर्गतं कर्तव्यकार्यस्य उपरि पूर्वमेव सीमा स्थापिता अस्ति । राज्यसर्वकारेण ४१७ लक्षकार्यदिनानां आग्रहः कृतः आसीत्, यदा तु भारतसर्वकारेण एतावता केवलं २५० लक्षकार्यदिनानां अनुमोदनं कृतम् अस्ति । परन्तु मनरेगा आग्रहचालितं योजना इति कारणतः अतिरिक्ततायाः माध्यमेन अपि पश्चात् धनस्य आग्रहः कर्तुं शक्यते ।

## स्पर्शलेखः धनस्य स्थानान्तरणे बाधकं भवितुम् अर्हति

अधुना मनरेगा-अन्तर्गतं भारतसर्वकारात् आगच्छन्तं धनं स्पर्श-राज्य-नोडल-अकाउण्ट्-माध्यमेन आगमिष्यति । भारतसर्वकारेण हिमाचलप्रदेशस्य ग्रामीणविकासविभागाय अपि शीघ्रमेव प्रक्रियां सम्पन्नं कृत्वा स्पर्शं प्रति स्थानान्तरणं कर्तुं कथितम् अस्ति। एकदा एतस्याः प्रणाल्याः माध्यमेन धनम् आगतं चेत् राज्यसर्वकाराः तस्य उपयोगं अन्यप्रयोजनाय कर्तुं न शक्ष्यन्ति। तदनन्तरमेव प्रशासनिकव्ययः अपि दास्यते। एतस्य धनस्य प्राप्तेः कारणात् अधुना यावत् हिमाचले नियुक्तानां ग्रामरोजगारसेवकानां कृते मानदं न दत्तम्।

# प्रत्येकपञ्चायते कृषियन्त्रभाडाकरकेन्द्राणि संस्थाप्यन्ते – विजयकुमारसिन्हाः



लघु- सीमान्तकृषकाणां कृते आधुनिक-कृषियन्त्रसुविधा आधुनिक- यंत्रीकरणेन कृषिप्रधानत्वं वृद्धिं गमिष्यति। राज्यः चत्वारिंशत् प्रतिशतपर्यन्तम् अनुदानप्रदानं विविधाः कृषिसंघाः आत्मसहायतासमूहाः च योजनाफलम् उपार्जयितुं समर्थाः।
माननीय- उपमुख्यमन्त्री- सहकृष्यमन्त्री विजयकुमारसिन्हाभिः उक्तम्–"बिहारराज्ये कृषिरेखाचित्रे अन्तर्गतं प्रत्येकपञ्चायते कृषियन्त्रभाडाकरकेन्द्राणि संस्थाप्यन्ते। अस्याः योजनेः प्रधानलक्ष्यं लघु– सीमान्तकृषकाणां कृते आधुनिकयन्त्रसुविधा प्रदातुं यतः ते समयोचितकृषिक्रियासु संलग्नाः स्युः। फलतः कृषिव्ययः न्यूनः, श्रमोपयोगः च सुसाध्यः भविष्यति आणि कृषिप्रधानत्वं वृद्धिं प्राप्स्यति।"

**विजयकुमारसिन्हाभिः सञ्जिन्वत्–**

"कृषियन्त्राणि यथा हलक्रियायै बीजानयनायै/ विरोपणायै हार्वेस्टिङ्ग तथा थ्रेसिङ्गकृत्येण किरयार्थं लभ्यन्ते। अतोऽग्रम् नवयन्त्रसुविधाभावेन वञ्चिताः लघु–सीमान्तकृषकाः अपि वर्तमानयुगस्य आधुनिककृषितन्त्राणां लाभं आनयितुं समर्थाः स्युः।" तेन योजनया सह एकस्य केन्द्रस्य संरचनाव्ययः दशलक्षरूप्यकाणि निधीयन्ते। प्रत्येकपञ्चायते स्थानीयकृषिचक्रानुरूपं प्रतिकृते न्यूनतमेकं यन्त्रं गृह्यते। राज्यः अस्य व्ययः चत्वारिंशत् प्रतिशतपर्यन्तं अनुदानरूपेण प्रदातुं सज्जः, यत् अधिकतमं चत्वारिलक्षरूप्यकाणि संसाधनान् पूरयिष्यन्ति।
अस्माद्दृष्ट्या योजनाफलं प्रगतिशीलकृषकाः, जीविकासमूहाः, ग्रामसंगठनानि, कृषि-उत्पादकसंघटनानि, आत्मसहायतासमूहाः, राष्ट्रबैंक- संबद्धकृषककक्लबसमूहाः च प्राप्तुं शक्नुवन्ति। अद्यपर्यन्तं राज्ये ९५० केन्द्राणि संस्थापितानि, आगामीवित्तवर्षे २०२५–२६ मध्ये २६७ नवानि केन्द्राणि स्थापयितुं निर्धारितम्।

# विश्वविद्यालयस्य आन्तरिकशिकायतसमितेः तत्वे 'लैंगिकसंवेदनशीलता' कार्यशाला



**हिमसंस्कृतवार्ताः- बिहारः।** ललितनारायणमिथिलाविश्वविद्यालये कुलपति प्रो. संजयकुमारचौधरीवर्यस्य निर्देशानुग्रहेण गतमासे पुनर्गठितायाः आन्तरिक-शिकायतसमितेः (ICC) तत्वे संस्कृतविभागे 'लैंगिकसंवेदनशीलता' इति विषयककार्यशाला आयोजिता। दीपप्रज्वलनसमये पीठासीन अधिकारी प्रो. मंजू राय उक्तवती– "युवानः सर्वे लैंगिकसंवेदनशीलाः भूत्वा प्रत्येकस्य सत्कारयुक्तम् आचरणं कुर्वन्तु; परिवर्तनारम्भः स्वगृहात् आरभ्येत, कार्यस्थले च महिलाः सुरक्षिताः इति अनुभवयेत्। अभद्रतां मानसिकरोगरूपेण दृष्ट्वा यः किंचित् यथार्थलैंगिकविकार निधीयते, सः मम समीपं अवश्यम् आगच्छतु- तस्य त्वरितनिरीक्षणसमाधानं भविष्यति।"
आन्तरिकशिकायतसमितेः सदस्या प्रो. मनसा कुमारी सुल्तानिया अपि अवदत्– "आधुनिके युगे छात्राः सर्वेषु क्षेत्रेषु अग्रे गच्छन्ति। स्त्री-पुंसयोः सहयोगः सम्मानश्च आवश्यकीयौ, पूर्वाग्रहं च अहंकारं च हृदि न धारयेत्।"
सीएमएसएम् कालेजे हिन्दी–प्राध्यापिका डॉ. बिन्दु चौहान व्यावहारिकदृष्ट्या अवदत्– "भारतीयपरम्परा अर्धनारीश्वररूपेण सर्वमेकीकुरुते। नारी वस्तुः न, पुत्री- भगिनी- माता- पत्नी च भवति। प्रत्येके संवेदना निहिता अस्ति। ताम् जागृयताम्।" एमएलएसएम कालेजे रसायनशास्त्र- प्राध्यापिका डॉ. अंजू कुमारी अवदत्– "नारी– पुरुषयोः योगक्षमतायाः वा जैववैज्ञानिकं भेदं नास्ति। शिक्षा–जागरूकतया नारी स्वाधिकारान्, सरकारीसुविधाः च यथोचितं ग्राहयेत्, अन्धश्रद्धां त्यक्त्वा नवसमाजस्य निर्माणं कर्तुं समर्था भविष्यति।"
डब्ल्यूआईटी– उपकुलसचिव्या डॉ. प्रियंका राय उक्तवती– "सर्वे मानवाः एकस्मात् परमात्मनः सन्तानाः इति मन्यन्ते न तु स्वस्वरूपात् विचलिताः। वसुधैव कुटुम्बकम् संस्कारः पुनः स्मर्तव्यम्।"विषयप्रवेशे डॉ. शांभवी 'लैंगिकसंवेदनशीलता' कार्यशालायाः उपयोगितां, ICC–संस्थापनलक्ष्यं, भावीयोजनां च विस्तरेण प्रकाशयत्। सा अवदत् यत् भारतस्य सर्वोच्चन्यायालयेन 'प्रिवेन्शन ऑफ सेक्सुअल हैरास्मेंट ऐक्ट २०१३' आधारे सर्वे विश्वविद्यालये ICC–संस्था अनिवार्या जाताः, येन समये– समये कार्यशाला– सेमिनार–जागरूकताकर्माणि आयोज्यमानानि सन्ति।
धन्यवादप्रस्तुतौ संस्कृतप्राध्यापिका डॉ. ममता उक्तवती– "न्यायप्रियः भवतु, यत् आचरणं स्वयमेव न रोचते तद् अन्यों सह न कुर्मः। UGC द्वारा २०१५ तमे ICC–संस्थापनं जातम्, येन कार्यस्थले स्वस्थवातावरणं निर्मीयताम्।"
उपस्थिताः प्रमुखाः- डॉ. अमरेंद्र शर्मा, डॉ. मोना शर्मा, रानी झा, प्रियंका सरकार, ऋद्धि कुमारी, पद्मा श्री, त्रिदीप दास, शशांक शेखरः, उत्साह निषाद् इत्यादयः अष्टाशीत्यधिकाः जनाः उपस्थिताः। अतिथीनां स्वागतं पाग– चादर–पादपदानेन पूर्णम्। मंगलाचरणं संस्कृत–शोधार्थी रजनीश्वरझा अकरोत्। अतिथिवन्दनं शोधार्थिनी ज्योति कुमारी संस्कृत– प्राध्यापकेन डॉ. आर. एन. चौरसियावर्येण च कृतम्।

# विश्वमलेरियादिनविशेषे पर्यावरणभारतीद्वारा माध्यमेन वृक्षारोपणकार्यक्रमः




**हिमसंस्कृतवार्ताः पाटलिपुत्रम्।** विश्वमलेरियादिनविशेषे पर्यावरणभारतीणां माध्यमेन देववृक्षस्य गूलरस्य आम्रफलवृक्षस्य च पञ्चपादपाः रोपिताः। अस्य वृक्षारोपणकार्यक्रमस्य नेतृत्वं पाटलिपुत्रमहानगरस्य वृक्षोपक्रमप्रमुखे हिमालयेन कृतम्। वृक्षारोपणे सहयोगं साक्षी अग्रवाल प्रदत्तवती।पर्यावरणभारतीसंस्थापकः रामबिलास शाण्डिल्यः उक्तवान् यत् मानवजीवनस्य स्वास्थ्यरक्षणाय वृक्षारोपणयोजना अत्यन्तावश्यकः एव। हरितवृक्षैः एव अस्मभ्यं प्राकृतिकवायुः लभ्यते। राजेन्द्रनगर- सेवाबस्त्याः कन्या नैना मलिक बोकारोवासिना अविनाशमल्लिकेन सह विवाहं समारोपितवती सन् नवदम्पत्याः जीवनस्य सुखमयत्वाय एतत् वृक्षारोपणम् अतीव स्मरणीयं कार्यम् इति उद्घोषितम्।अप्रैलमासे एव वैश्विकतापनस्य (ग्लोबलवार्मिङ्ग) भीषणप्रभावः दृश्यते। पक्षिणः उष्णवातात् मोहिनः भवन्ति, मानवाः दिने अभ्यंतरगृहेषु निगृहीतानि, ताल–तलैया क्षीणानि जातानि, जलस्तरः निरन्तरं अवरोहति। एषा स्थिति जनसंख्यावृद्धेः च वृक्षानां अनियन्त्रितच्छेदनस्य च परिणामः। अतः वृक्षारोपणं कुर्वन् जीवनं रक्षस्व। २५ अप्रैल २००७ दिनांके प्रथमं विश्वमलेरियादिनम् मानितम्। मलेरियापरजीविनः शोधं फ्रान्सदेशे चिकित्सकः चार्ल्स लुइस अल्फोंस लेवरने कृतवान्। विश्व- स्वास्थ्य- संस्थानुसारं जॉर्जिया प्रथमं मलेरियामुक्तदेशः घोषितः, ततः अल्जीरिया, काबोवर्डे, मॉरीशस इति अफ्रीकादेशाः अपि मलेरियामुक्ताः अभवन्। भारतराज्ये राजस्थानमध्ये ९७ प्रतिशतं मलेरियानाशः लभ्यते; एतत् प्रथमं भारतीयराज्ये अभवत्। विश्वमलेरियादिनस्य उद्देश्यं मानवजातिं सचेततां कर्तुं, रात्रौ शयने मष्कावरोधिनी- उपयोगाय प्रेरयितुम्।

## मलेरियापरिरक्षणार्थम्

– जलसंचयः न भवेत्। – पूर्णशरीरावरणं धार्यताम्।
– ज्वरलक्षणदृष्टव्ये चिकित्सकपरामर्शः शीघ्रम्। तेजोन्मूलकज्वरात् शीतातपः, शरीरकम्पः, शिरोशूलः, वान्तिः, दुर्बलता, क्लान्ति च। सर्वे मानवाः स्वास्थ्यजीवनमिच्छन्ति। अतः गृहपरिसरे वृक्षारोपणयोजनां प्रवर्तयन्तु।

## पर्यावरणभारती वृक्षारोपणकार्यक्रमे प्रतिभागिनः

नैना मललिक, अविनाश मलिक, साक्षी अग्रवाल, रूबी देवी, हिमालयः, डॉ. विनय बिहारी, रंजन कुमारः, रामबिलास शाण्डिल्यः, सूरज मलिक, रॉकी, राहुल्, गोलू, आनंद कुमारः, अंकितः, सोनू, विशालः, अक्षत राजः, दीपक कुमारः इत्यादयः। एतत् स्मरणीयं कार्यक्रमम् अस्ति। वृक्षारोपणं जीवनरक्षणाय अनिवार्यम्।

# "लौकिकन्यायकोशः"

# "गोक्षीरन्यायः"

महिषीदुग्धं गोदुग्धेन सह मिश्रितं चेदपि गोक्षीरस्य उपरि तस्य परिणामो न भवति। प्रत्युत् सर्वमपि दुग्धं गोदुग्धं भूत्वा पवित्रं भवति। एवम् अपवित्रवस्तुनः मिश्रणेन कस्यापि पवित्रस्य वस्तुनः पवित्रता नष्टा न भवति इति अस्य न्यायस्य आशयः।

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**